M. T. B. COLLEGE, SURAT

*Manuscripts Library*

No. Ref.
Sor. 5539

Title : Gādādharī-
Kāśikā

553
a

(a fragment)

C

| | |
|---|---|
| Gādādhari-karnsikā | Title |
| Krsna Bhatta Ese. | Author |
| | Editor |
| | Year, Vols. |
| | Publisher |
| 553a ends abruptly | Remarks |

प्र· श्रीगणेशायनमः हरिपादौनमस्कृत्यकृष्णेनारायणानुजः विवृणोत्यध्यक्षटीकां
१ गदाधरपदाश्रयाँ १ प्रत्यक्षदीधितिप्रौढिप्रौढिगाँधाँरेमते· प्रचारे कौरंगनाथैः सा
हसंक्षम्यतांबुधाः १ मूले अथेति अथात्रप्रमाणतत्वंविविच्यतेइतियोजना· अथ
मंगलस्यकारणतानिरूपणानंतरं· अत्र कर्तव्यग्रंथेप्रतिपाद्यत्वंसप्तम्यर्थः तस्य
प्रमाणतत्वेन्वयः यद्वाऽधीनत्वंसप्तम्यर्थः तस्याविवेचनेऽन्वयः विविच्यतेइत्यत्रधा
त्वर्थविवेचनघटकबोधेऽन्वयः मयेत्यध्याहृतस्यगंगेशमिश्रेणेत्यर्थः कृतिजन्य
त्वंतृतीयार्थः तस्यधात्वर्थविवेचनेन्वयः विवेचनंपरमतनिराकरणपूर्वकस्वमत
व्यवस्थापनं· व्यवस्थापनंचप्रमाणत्वतयाबोधनंएवंचबोधद्वारकंविषयत्वंक
र्मलकारार्थः प्रमाणतत्वंइंद्रियादिचतुष्कसमनियतंप्रमितिकरणत्वं तथाच
गंगेशमिश्रवृत्तिकृतिजन्यताद्दशास्वमतकथनविषयोनिरुक्तंप्रमाणतत्वमि
तिवाक्यार्थः परमकारुणिकः परेकविंशतिदुःखप्रहाणेच्छाकरुणा· साचप
रमा· सफलाशास्त्रार्थज्ञानद्वारामुक्तिसंपादकत्वात्· स्थानं· प्रभेदः तथा २

चोक्तं। अंगानिवेदाश्चत्वारोमीमांसान्यायएव· धर्मशास्त्रपुराणंचविद्याह्येताश्च
तुर्दश· आयुर्वेदोधनुर्वेदोगांधर्वश्चेतितेतत्रयः अर्थशास्त्रंचविज्ञेयंविद्याह्य
ष्टादशैवतुइति· एतद्विशेषणादध्ययनधर्मेलाभः दुःखस्यपंकसादृश्यकथनं
तदनुभावधारारतउक्षारवाधशंकावारणाय· गदा· नत्वेति श्रीकृष्णनमस्कारो
त्तरकालीनगुरूच्चरितवाक्यार्थस्मरणोत्तरकालीनंदीधितिकृत्कर्तृकंयत्प्रत्यक्षचिं
तामणिविवरणंतद्विवरणकर्त्तागदाधरइतिश्लोकार्थः द्वितीयविवरणेतार्कि
कसमवेताह्लादजनकत्वान्वयः गुर्विति· नत्वाविनायकादिस्तवपादस्यपृथक्त्वि
घ्नध्वंसहेतुत्वेपिगुरुपदोच्चारणस्यतथात्वमप्रामाणिकमितिवाच्यंतदधीनत्वो
स्म त्कृष्टज्ञानेमंगलत्वात्· तस्यायुर्धनमितिवन्मंगलत्वं· तदुत्कर्षः ग्रंथोत्कर्षः अ
र्थस्येतरापरिशीलितत्वादिर्वा· संबंधसंपादनंतत्संपत्तिप्रयोजकव्यापारःकृ
र्तीत्यर्थः सचप्रकृतेआश्रयमात्रं· एवमग्रेपितत्सहकारित्वं· गुरुवाक्यसहका

प्र· रित्वं·गुरुवाक्यजन्यशाब्दबोधस्यातीतत्वेनविवरणनिर्माणेनुपयोगाद्व्याचष्टे·
र सहकारित्वंस्वेति·परंपरया·संस्कारद्वाराफलं·स्मरणं·यद्यपिमनोनिष्ठताद्दृशा
ह संस्कारितानिरीहकव्यापारोत्तरत्वंविवरणनिर्माणेऽलक्ष्यतेतथापितुपयोगित्वांते
नोपयोगितावच्छेदकीभूतसंस्कारविशेषस्याहित्यंलक्ष्यतेइतितत्रतदधीनार्थनिश्च
यस्यैरोपयोगित्वमभिप्रेत्याहतथाचेति·संस्कारउद्बुद्धः मनसेत्यस्यनिश्चयेऽन्वयः
तादृशमनोजन्यार्थनिश्चयः स्मृतिर्मानसबोधोबोधौसध्रीचीनत्वरूपविशेषणंतु
वि अर्थेवैयंजनिकविशेषणलाभार्थंतत्त्वार्थ्येमनसोरसंबंधेनलभ्येताऽतःसंबध्यत्व
मुक्तंसंबंधश्चसंस्कारोनुसंधानंवा.वस्तुतोनिबद्धव्यमितिपाठःसंबध्यमित्य
स्यापिसएववार्थः परिशीलनंसम्यग्ज्ञानंतच्चशास्त्रेतन्नूनामप्यर्थानांपोष
णस्यपुष्टानांचतानवस्य·एवंचमिश्रप्रभृतीनांतादृशसंस्कारानुद्बोधात
परिशीलनेवैपरीत्यमितिसूचितं·अभ्युदयार्थतात्पर्यव्यतिरेकेणतात्पर्यवि
षयत्वंव्यंग्यंतदुत्कर्षीतरमाहसिद्धांतेति·संशयादपिदुःखंजायतेसंतापसं २